यद्वा अहम् अनन्तस्वरूपोऽस्मि। ततश्चाहमनन्तशक्तिमानस्मि। न मे शक्तेः स्वरूपस्य वा पारं पारयितुं कोऽपि प्रभवति। उक्तं हि 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इत्यादि। यद्वा ओमित्यनन्तबीजोऽहम्, ततश्च ब्रह्मणोऽनन्तत्वात् अहं ब्रह्मस्वरूप इति कृत्वा अहं ब्रह्मस्वरूपोऽस्मीत्यर्थः। भागप ओम् इह ओमाङोश्चेत्यनेन पररूपमिति भागपोम् सेत्स्यति।

पुनः किंविशिष्टोऽहमित्याह। हम् इति। हम् इति परमात्मनो बीजम्, तत्स्वरूपोऽहमित्यर्थः। ततश्च मदुपासनयाऽपि परमात्मवत् सर्वकार्येषु ते सामर्थ्यं समुत्पत्स्यते। अत्र यद्वक्तव्यं तत्सर्वं समिति विशेषणव्याख्यायामुक्तम्। हंसबीजेऽपि पूर्ववदवगन्तव्यम्।

यद्वा हमिति शिवबीजम्। ततश्च तदुपासनया शिववत्सामर्थ्यवान्भवति। एवं च शेते जगद् यस्मिन्निति शिवः। तत्स्वरूपतया मां सर्वसंसारिजनक्षेमाशुभकरणसामर्थ्यवन्तं जानीहीति भावः।

अथवा मैं अनन्तस्वरूप वाला हूँ। इससे यह सिद्ध हुआ कि मैं अनन्त शक्तिमान् हूँ। मेरी शक्ति और स्वरूप का कोई भी पार नहीं पा सकता है। कहा भी गया है कि— "जहाँ मन सहित वाणी उसके स्वरूप को न पाकर लौट आती है" इत्यादि। अथवा ओम् ऐसा अनन्त बीज वाला मैं हूँ। इससे ब्रह्म के अनन्त होने से मैं ब्रह्म स्वरूप हूँ। फिर मैं कैसा हूँ? इस अभिप्राय से कहा गया है कि "हम्"। हम् यह परमात्मा का बीज है। अर्थात् मैं तत्स्वरूप हूं। इसलिए परमात्मा की तरह से मेरी उपासना से भी सभी कार्यों में तुम्हारा सामर्थ्य हो जाएगा। यहाँ जो कुछ कहना है सब "सम्" इसकी व्याख्या में कहा जा चुका है। वैसे ही हंस बीज पर भी समझना चाहिए।

अथवा हम् यह शिव बीज है। इसलिए इसकी उपासना से उपासक शिव की तरह सामर्थ्यशाली होता है। जिसमें संसार सोता

यद्वा शिव इति कल्याणस्वरूपोऽहम् । एवं च शिवसादृश्येन आशुतोषकत्वमभिव्यज्यते । उक्तं हि "तथापि स्मर्तॄणां वरद परमं मङ्गलमसि" इत्यादि शिव-स्वरूपत्वे तद्गुणा अवगन्तव्याः ।

यद्वा हमिति कोप । तद्वति लक्षणा । अर्श आदित्वात् अच् वा । ब्रह्मणो विशेषणत्वात् नपुंसकता । ततो नृसिंहस्वरूपत्वात्कोपयुक्तः । एवञ्च कोपबहुलं नृसिंहमेहीति तदाशयः । अथवा हमिति मम विशेषणम् । ततश्च कोपे प्रभविष्णुं स्वयं क्रोधादिरहितमित्यर्थः । एवं तस्य ममैवोपासनया कोपे समर्थो भविष्यति, न तस्य कोपः किञ्चिदप्यनिष्टं न वा तमाक्रन्दयितुं प्रभवतीति भावः ।

पुनः किं विशिष्टोऽहमित्याह-वां बीजरूपोऽहम् । वामिति वरुणस्य बीजम् । ततश्च वरुणस्य बीजमुत्पत्तिस्थानम् । मत्सकाशादेव वरुणः प्रादुर्भवति । अथवा वरुणस्य जलाधिपतित्वादहमेव तदुत्पत्तिस्थानम्

है उसे शिव कहते हैं । तत्स्वरूप होने से अपने को सांसारिक जनों के कल्याण और अशुभ करने में समर्थ समझो ।

अथवा शिव अर्थात् मैं कल्याणस्वरूप हूँ । इस प्रकार शिव के सादृश्य से मेरा आशुतोष होना अभिव्यक्त होता है । कहा भी गया है कि "स्मरण करने वालों को वर देने वाले अति कल्याण स्वरूप हो ।" इत्यादि । शिव स्वरूप होने पर उसके गुण भी हों जायेंगे ।

अथवा हम् का अर्थं कोप है । इसप्रकार कोपविशिष्ट में लक्षणा होगी । नपुंसक लिङ्ग ब्रह्म का विशेषण होने से है । इसका आशय यह है कि कोप से युक्त नृसिंह को प्राप्त करो । अथवा हम् यह विशेषण है । इस प्रकार कोप पर समर्थ स्वयं क्रोधादि से रहित उसको प्राप्त करो । उसकी अथवा मेरी उपासना से कोप पर समर्थ होजाओगे । कोप उसका न तो कुछ अनिष्ट कर सकता है और न तो उसको अपने वशीभूत कर सकता है ।

अहं तत्प्रादुर्भावकः। न खलु तत्र मत्सत्वे अतिवृष्टिरनावृष्टिर्वा सम्भवतः। मद्भक्तोऽपि तन्निग्रहावग्रहे समर्थो भवति। अथवा वरुणबीजरूपत्वे स्वस्य शान्तस्वभावत्वं व्यज्यते। इति।

यद्वा वामिति विष्णुबीजम्। ततश्च विष्णुबीजत्वेन जगति व्यापकत्वं स्वस्य सूचितं भवति। अथवा मम विष्णुबीजत्वेन ममोपासनया विष्णुवद् व्यापकत्वं परकायप्रवेशादिशक्तिमत्वं च ते सम्पत्स्यते। अथवा ममोपासनया जगति विद्यमानानां पदार्थानां स्वस्वरूपधारणे शक्तिमान् भविष्यति। यथा रामोपासनया शक्तिलाभात् हनुमता मशकरूपधारणं कृतमिति अहिरावणवधे तुलसीकृतरामायणे प्रसिद्धम्। अथवा वामिति विष्णुबीजोहमिति विष्णोरप्यहमेवोत्पादक इति ब्रह्मरूपत्वं स्वस्य सूचितं भवति। विधिहरिहरादीनामुत्पादकं ब्रह्मैव।

फिर मैं कैसा हूं? इस आशय से कहा गया है कि मैं वाम् बीजरूप हूँ। 'वाम्' वरुण का बीज होता है। इससे वरुण की उत्पत्ति होती है। अतःमुझ से ही वरुणकी उत्पत्ति होती है। अथवा वरुण के जल के स्वामी होने से मैं ही उसका उत्पत्ति स्थान हूँ। अर्थात् मैं उसका उत्पादक हूँ। वहाँ पर मेरी स्थिति होने से अतिवृष्टि और अनावृष्टि की सम्भावना नहीं होती है। मेरा भक्त भी उसके करने न करने में समर्थ होता है। अथवा वरुण बीज रूप होने से मेरा शान्त स्वभाव व्यक्त होता है।

अथवा "वां" विष्णु बीज है। इस प्रकार विष्णु बीज होने से संसार में मेरा व्यापक होना सूचित होता है। अथवा मेरे विष्णु बीज रूप होने से मेरी उपासना से विष्णु की ही तरह व्यापक होना अर्थात् दूसरे के शरीर में प्रवेश कर जाने की शक्ति तुझे हो जाएगी। अथवा मेरी उपासना से संसार के सभी पदार्थों को अपने स्वरूप में धारण करने में समर्थ होजाओगे। जैसे तुलसीकृत रामायण में अहिरावणवध के प्रसंग में राम की उपासना से शक्ति लाभ करके

अथवा विष्णुबीजोऽहमिति। वेवेष्टि सर्वत्र व्याप्नोतीति विष्णुः। विष्णुबीजत्वात् सर्वत्राप्यहमेव विद्यमानोऽस्मीति कस्यचिदप्युपासनया ममोपासना भविष्यति, ममोपासनया वा तवाभिमतस्योपासना भविष्यतीति तदर्थः।

पुनः किं विशिष्टोऽहमित्याह। क्रीं रूपोऽहम्। क्रीमिति कालिकाबीजम्। ततश्च कालिकावत्सर्वसामर्थ्यवानहमस्मीत्यर्थः। व्याख्यातमिदं पूर्वं यमिति विशेषणव्याख्याने। अथवा क्रीमिति शक्तिबीजम्। ततश्च शक्तिमानहमस्मीत्यर्थः। अथवा ममोपासनया च शक्तिमान् भवति। अथवा शक्तिबीजत्वात् मत्त एव शक्तेरपि प्रादुर्भावो भवति, अथवा ममोपासनया शक्तेरप्युपासना स्वत एव फलिता भवतीत्यर्थः।

पुनः किं विशिष्टोऽहमित्याह। आँ रूपोऽहम्। अणोऽप्रगृह्यस्यानुनासिक इत्यनुनासिकः। आकाररूपोऽहम्। एतेन पितामहरूपोऽहमित्यर्थः। एवं च जनकस्याप्यहमेव जनकः। तत इदं फलितं भवति।

हनुमान् का मशक रूप धारण करने का वर्णन है। अथवा वाम् बिष्णु बीज है अतः विष्णु का भी मैं ही उत्पादक हूँ इस प्रकार मेरा ब्रह्म स्वरूप सूचित होता है।

ब्रह्मा, विष्णु और महेश का भी उत्पादक ब्रह्म ही है। अथवा विष्णु बीज स्वरूप मैं हूँ। जो सर्वत्र व्यापक होता है उसको विष्णु कहते हैं। विष्णु बीज रूप होने से सर्वत्र मैं ही विद्यमान हूँ। इस प्रकार किसी की भी उपासना से मेरी उपासना होगी। अथवा मेरी उपासना से तुम्हारे इष्टदेव की उपासना होगी।

फिर मेरा कैसा स्वरूप है? इस आशय से कहा गया है कि मैं क्रीं रूप हूँ। क्रीं कालिका बीज है। अतः कालिका की तरह मैं सर्व सामर्थ्यवान् हूँ। इसकी व्याख्या "यम्" विशेषण इसकी व्याख्या के अवसर पर की जा चुकी है। अथवा क्रीम् शक्तिबीज है अर्थात् मै

वृक्षादीनामुत्पादकस्य बीजस्याप्यहमेवोत्पादकः। अथवा पितामहबीजत्वात्पितामहस्वरूपोऽहमित्यर्थः। परमेष्ठी पितामह इत्यमरः। एवं च ब्रह्मरूपत्वान्मे चतुर्णामपि वेदानामहमेव तत्त्वज्ञाताऽस्मीत्यर्थः। अथवा आँ इति पूजायाम्। ततश्च पूजारूपोऽहमित्यर्थः। एतेन पूजाक्रियास्वरूपत्वं स्वस्य फलितं भवति तेन सकलदेवपूजायामहमेव तेषामाराध्यदेवोपासनायाः समुपस्थापक इति भावः। अथवा आ इति माङ्गल्ये। उक्तंहि—अकारो वासुदेवः स्यादाकारस्तु पितामहः। पूजायामपि माङ्गल्ये आकार परिकीर्तितः इत्येकाक्षरकोशे।

ततश्च माङ्गल्यरूपोऽहमस्मीत्यर्थः। एवं च मम माङ्गल्यस्वरूपत्वान्ममोपासनया सर्वाण्यपि मङ्गलानि साधियतानि भवन्ति। अथवा मम माङ्गल्यरूपत्वान्ममागमनेन सर्वेषामपि मङ्गलानां स्वत एव आगमो

शक्ति-मान हूं। अथवा मेरी उपासना से उपासक शक्तिमान् होता है। अथवा शक्तिबीज होने से मुझ से ही शक्ति का प्रादुर्भाव होता है। अथवा मेरी उपासना से शक्ति की भी उपासना स्वतः ही हो जाती है।

फिर मेरा स्वरूप कैसा है? इस आशय से कहा गया है कि "मैं आ रूप हूँ" इस प्रकार रूप होकर मैं पितामह स्वरूप हूँ। और जनक का भी मैं ही जनक हूँ। इसका आशय यह है कि वृक्षादि के उत्पादक बीज का भी मैं ही उत्पादक हूं। अथवा पितामह बीज होने के कारण मैं पितामह स्वरूप हूँ। इस प्रकार मेरा ब्रह्म रूप होने से चारो भी वेदों का मैं ही तत्वज्ञाता हूं। अथवा आ का पूजा अर्थ लेने पर मैं पूजारूप हूँ। इससे अपना पूजाक्रिया स्वरूप फलित होता है। अतः सभी देवताओं की पूजा में मैं ही उनके आराध्य देव की उपासना का समुपस्थापक हूँ। अथवा आ का अर्थ मंगल है। कहा भी गया है कि—एकाक्षर कोष में – अकार का अर्थ वासुदेव और आकार का पितामह, मंगल और पूजा अर्थ होता है।

भवतीत्यर्थः। अत्र आकारादिबीजानां तन्त्रगतत्वेन ऋषिदृष्टत्वात् छान्दसत्वम्। 'ततश्छन्दसि दृष्टानुविधिः, अथवा निपातत्वाद् अव्ययत्येन विभक्तिलोप इति।

'हे' इति। हे इति सम्बोधने आमन्त्रणे वा। भव्या इति। अथवा हे इति सप्तम्यन्तम्। हकारः कोपार्थकः। ततश्च हे कोपे सति। प्रत्यासत्या मम कोपे सति अहं भागपः। भागं पिवतीति भागपः। अंशानामपि नाशकोऽस्मीर्थं। यद्यपि, कामक्रोधादिविकारशून्यस्य निर्द्वन्द्वस्य निरहंकारस्य च क्रोधस्तथापि स्वसामर्थ्यस्वरूपप्रदर्शनाय तथोक्तं न विरुध्यत इति ॥१॥

अथ जीवं पुनरपि स्वाभिमतदेवे समुन्मुखीकुर्वन्नुपदिशति—

भां हां हिं हौं हीं वं लं यं सं त तादृरो भाग! सं वं लं हे।
देव! भक्तमयं मम हे सत्त्वं हि हं यं वं वायं कम् ॥२॥

हे भाग! हे अंशभूतजीव! जीवस्यईश्वरांशत्वात् तदंशभूतत्वं प्रसिद्धम्। यद्वा जीवब्रह्मणोरभेदत्वेऽपि अग्नेः स्फुलिङ्गाः, राहोःशिरः इतिवद्भेदोऽवगन्तव्यः। वस्तुतस्तु प्रतीयमानभेदेऽपि सुवर्णस्य कुण्डलमिति वत्कुण्डलस्य सुवर्णादभिन्नत्वमेवावगन्तव्यम्।

अर्थात् मैं मांगल्य रूप हूं ऐसे मेरे मंगल स्वरूप होने से मेरी उपासना से सभी मंगल सिद्ध होते हैं। अथवा मेरा मंगलमयरूप होने से मेरे आगमन से सभी मंगलों का आगम अपने आप ही होता है। यहाँ पर आकारादि बीजों का तन्त्र में वर्णन न होने से ये छान्दस हैं अतः विभक्ति का लोप हो गया है।

"हे" यह सम्बोधन और आमन्त्रण अर्थ में है। अथवा "हे" सप्तम्यन्त रूप है और हकार का अर्थ कोप होता है। इसप्रकार इस प्रकार' कोप होने पर " ऐसा अर्थ हुआ। भाव यह है कि मेरा कोप होने से मैं 'भागप' अर्थात अंशो का नाश करने वाली हूँ। यद्यपि

उक्तं हि 'सत्यपि भेदापगमे नाथ ! तवाहं न मामकीनस्त्वम् । सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः ।' इत्यादि । विशेषतोऽत्र वक्तव्यमस्मत्कृतशङ्करविजयनाटकादवगन्तव्यमित्यलमत्र बहूक्तेन ।

यद्वा भां दीप्तिं सर्वदा प्रकाशमानत्वाद् दीप्तिस्वरूपं केवलज्ञानम्, अगति गच्छतीति भाग । क्षपकश्रेणिमापादयन् केवलज्ञानमापन्नो जीव इत्यर्थः । आर्हतदर्शने चेत्थमेव प्रतिपादनाज्जीवस्य तथात्वमवगन्तव्यम् । तत्सम्बुद्धौ हे भाग ! प्रकरणवशात् हे जीव ! अथवा अर्श आदित्वादचि हे भाग ! हे जीविन्, भविकजीविन्निति शुभकर्मकारित्वादवगन्तव्यम् ।

यद्वा भां देदीप्यमानत्वाद्दीप्तं दीप्तिस्वरूपं वा ईश्वरं गाते प्राप्नोतीति भागः । गाङ् गताविति धातोः । 'आतोऽनुपसर्गे कः' इति कप्रत्यये भागः ।

काम क्रोधादि विकारों से शून्य, निर्द्वन्द्व और निरहंकार को क्रोध नहीं होता है फिर भी अपने सामर्थ्य और रूप को दिखाने के अभिप्राय से ऐसी उक्ति भी असंगत नहीं हो सकती है ॥ १ ॥

तत्पश्चात् जीव को फिर भी अपने अभीष्ट देवता के प्रति आकृष्ट करते हुये उपदेश करती हैं कि—अंशभूत जीव ! जीव के ईश्वर का अंशभूत होने से उसका अंशरूप में होना प्रसिद्ध है। अथवा जीव और ब्रह्म का अभेद होने पर भी 'अग्नेः स्फुलिंगाः और राहोः शिरः' की तरह भेद होता है। वस्तुतः भेद की प्रतीति होने पर भी' सोने का कुण्डल' की तरह जैसे कुण्डल की सुवर्ण से अभिन्नता होती है वैसे ही समझना चाहिए।

कहा भी गया है कि—हे नाथ ! आप में और मुझमें भेद न होने पर भी अर्थात् सर्वथा एक होने पर भी मैं तुम्हारा हूँ तू मेरे नहीं हो। जैसे समुद्र और तरंग में कोई भेद न होने पर भी तरंग समुद्र का होता है परन्तु तरंग का समुद्र नहीं होता। भाव यह है कि अंशी से

यद्वा भाम् उक्तरीत्या ईश्वरं गायति भक्त्युद्रेकेण तद्गुणं तत्कर्म चेति भागः, तत्संबुद्धौ हे भागः ; द्वैतविशिष्टद्वैतवादिन् भक्त्या परमेश्वराराधकः ।

यद्वा भम् नक्षत्रम्, विशिष्टपुण्योदयवशाद् ध्रुवादिवन्नक्षत्रस्वरूपम् आसमन्ताद् गाते प्राप्नोतीति भागः, अथवा भम् अगतीति भागः ।

यद्वा नक्षत्रलोकानां स्वर्गस्वरूपत्वात् तदवस्थायित्वाद्वा तात्स्थ्यात्स्वर्गे उपचारः, ततश्च भं स्वर्गम् आगति, आसमन्ताद्गाते प्राप्नोतीति भागः । मीमांसकनये जीवो यज्ञादिना स्वर्गमाप्नोति ।

स्वर्गकामो यजेत, इत्यादिश्रुतयोऽत्रवीनम् । ततश्चायमर्थः,हे भाग ! हेयज्ञादिकर्मणा स्वर्गगामिन् ! जीव ! एवं सर्वसिद्धांतेषु भावनीयम् ।

अथ पुनरपि जीवं भक्तं वा, उन्मुखी करोति । द्विवद्धं सुवद्धं भवतीति नयात् स्वोन्मुखी करणाय द्विवारमुक्तं नानुचितमित्यवगन्तव्यम् ।

ही अंश होता है परन्तु अंश से अंशी नहीं होता । इत्यादि । यहाँ इस विषय पर अधिक नहीं कहा जा सकता, जिसे विशेष रूप से जानने की इच्छा हो, वह मेरे शंकर विजय नाटक में देख सकता है । यहाँ इतना कथन ही पर्याप्त है ।

अथवा— भा दीप्ति को कहते हैं, सदा प्रकाशमान होने से दीप्ति स्वरूप केवल ज्ञान है । भादीप्ति को अगति जो प्राप्त होता है उसको भाग कहते हैं । क्षपक श्रेणि को प्राप्त करता हुआ केवल ज्ञान को प्राप्त हुआ जीव । आर्हत दर्शन में इस प्रकार लिखने से जीव को ऐसा ही जानना चाहिये । सम्बोधन में हे भाग ! प्रकरणवश से हे जीव ! अर्शादि अच् होने पर हे भाग ! हे जीविन् ! भविक जीविन् यह शुभ-कर्म करने के कारण जनना चाहिये । यद्वा भां माने देदीप्यमान होनेसे दीप्ति कों, दीप्तिस्वरूप को वा ईश्वर को प्राप्त होता है वह भाग है । गाङ गतो धातु से 'आतोऽनुपसर्गे कः' इस सूत्र से क प्रत्यय होने से भाग सिद्ध होता है ।

हे देव ! दीव्यतीति देवः। दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु, इतिदिव्धातोः पचादित्वादचि गुणे च देव ! तत्संबुद्धौ हे देव ! हे क्रीडाभिलाषिन् ! संसारक्रीडानुरक्तइत्यर्थः।

यद्वा हे देव ! हे विजगीषो ! शुभकर्माध्यवसायतया कर्मक्षयकारत्वेन संसारविजयकारिन् जीव ! अथवा मातापितृकलत्रादिसम्बन्धसुखैकप्रवृत्तः, व्यवहारमात्रसंसारसत्तानुगामिन् नास्तिक जीवेत्यर्थः।

यद्वा द्युत्यर्थत्वात् देव ! द्युतिरवरूपम् ! ब्रह्मणश्चित्स्वरूपत्वेन तद्रूपतया तदंशतया वा जीवस्य तत्स्वरूपत्वमवगन्तव्यम्। ततश्चायमर्थः— हेदेव ! हें तेजोमय ! चित्स्वरूप ! यद्वा हे देव ! ईश्वरस्य नामस्मरणमात्रतो गुणोत्कीर्तनमात्रतो वा परमपदप्राप्तिरितिसिद्धांतात् हेस्तुतिकारिन् ! अथवा नवधा भक्त्युपासनेन स्तुतिकारणतयाऽस्य देवत्वमिति।

अथवा भाम्, उक्तरीति से ईश्वर के गुण और कर्मों का गान भक्ति से जो करता है वह भाग है। संबोधन में हे भाग! द्वैतविशिष्ट अद्वैतवादिन् भक्ति से परमेश्वर की आराधना करने वाले ?

अथवा भम्– कहते हैं नक्षत्र को विशेष पुण्योदय के कारण ध्रुवादि के सदृश नक्षत्र स्वरूप को जो सर्वतोभाव से प्राप्त होता है उसको भाग कहते हैं। अथवा भम्—नक्षत्र को जो प्राप्त करता है वह भाग है, अथवा नक्षत्र लोक स्वर्गस्वरूप होने से वा स्वर्ग में नक्षत्र स्थित होने से तात्स्थात् स्वर्ग में उपचार है। तो भं स्वर्ग को सर्वतोभाव से जो प्राप्त करता है वह भाग है। मीमांसकों के मन में यज्ञादि से जीव को स्वर्ग प्राप्त होता है।

स्वर्ग की इच्छा वाला यज्ञ करे इत्यादि श्रुतियां इसमें प्रमाण हैं। तो यह अर्थ हुआ कि हे भागः यज्ञादि कर्म से स्वर्ग जानेवाले हे जीव ! इस प्रकार सब सिद्धान्तों में जान लेना चाहिये।

इसके अनन्तर फिर भी जीव को वा भक्त को संबोधित करता है। दो बार बाँधा हुआ पक्का बाँधा जाता है इस नियम से, अपनी ओर

यद्वा हे देव ! हेमोदप्रिय ! देवलोकाभिलाषात्वेनास्य मोदप्रियत्वं व्यज्यते ।

यद्वा हे देव ! हेमदोन्मत्त ! ईश्वरवैमुख्येन संसारसुखैकमात्रानुरञ्जनान्मदोन्मत्तत्वमवगन्तव्यमिति । अथवा लोकप्रसिद्धो राजा ईश्वरः । अंगनाऽलिंगनादिजन्यं सुखं स्वर्गम् । अहमेव यथासंभवं संसारपदार्थकर्ता नास्तीश्वरः स्वर्गोवेत्याद्यध्यवसायान्नास्तिकत्वेनमदयुक्तत्वमवगन्तव्यमिति ।

यद्वा देवेति शयनकर्तः ! मोक्षप्रापकं मनुष्यदेहमवाप्य पुनरपि तथाविधकर्मकरणे, उदासीन इति शयनकर्तृत्वमौपचारिकमवगन्तव्यम् । अथवा धर्माद्युपार्जने निरपेक्षत्वात्सुप्त एवेति ज्ञेयम् ।

यद्वा हेदेवेति हे गमनशील ! तथाविधकर्मकरणतः पुनः पुनरावृत्तेः पुनः पुनर्जन्म मरणादिना संसारभ्रमणकारिन् ! स्वर्गप्राप्तावपि क्षीणे पुण्ये

आकर्षित करने के लिए दो बार कहा हुआ अनुचित नहीं समझना चाहिए ।

हे देव ! दीव्यतीति देव ! क्रीडा, विजिगीषा, व्यवहार, द्युति, स्तुति, मोद, मद, स्वप्न, कान्ति और गति अर्थवाली दिव् धातु से पचादित्वात् अच् प्रत्यय किया, गुण किया तो देव सिद्ध हुआ सम्बोधन में हे देव ! हे क्रीडा की इच्छा वाले अर्थात् संसार क्रीडा में अनुराग रखनेवाले अथवा हे देव ! हे विजय की इच्छावाले शुभकर्म करने के कारण कर्म को नाश करने से संसार को जीतनेवाले जीव ! अथवा माता-पिता स्त्री आदि के सुख में ही प्रवृत्त व्यवहार मात्र संसार सत्ता को मानने वाले नास्तिक जीव !

अथवा द्युति अर्थ होने से देव ! द्युतिस्वरूप ! ब्रह्म के चित स्वरूप होने से तद्रूपता से वा तदंशता से जीव को तत्स्वरूप जानना चाहिए । तो यह अर्थ हुआ हे देव ! हे तेजोमय: हे चित्स्वरूप ! अथवा हे देव ! ईश्वर से नाम स्मरण मात्र से वा गुणों के कीर्त्तन मात्र से

मर्त्यलोके वसन्तीति जगति परिभ्रमणशीलत्वमस्य मोक्षानुपलब्धेरवगन्तव्यम् ननु अपामसोमममृता अभूम, इत्यादि श्रुतिबलादमृतत्वेन मोक्षोपलब्धिरित स्वर्गप्राप्त्यनन्तरं न पुनरावर्त्तनमिति चेन्न अत्र,अमृतपदस्य चिरकालावस्थायित्वमात्र बोधनात्। यज्ञादिजन्यस्य स्वर्गस्य जन्यत्वेनानित्यत्वात्, न मोक्षरूपत्वम्।

केवलज्ञाने तत्वज्ञाने वा कर्मणां समूलोन्मूलनादभावरूपत्वात् कर्मणां, जीवस्य स्वत एव स्वस्वरूपोपलब्धिरिति तन्नये नित्य एव मोक्षः। तथा च श्रुतिः "न स पुनरावर्तते, न स पुनरावर्तते" इति एवं सर्वसिद्धान्तेषु याथयथमवगन्तव्यमिति।

एवं तमुन्मुखीकृत्य किंकथयतीत्याह। तादरो, इति तश्च, आदरश्च तादरौ तकारश्चौरः स च सकल संसारस्य स्वस्मिंल्लयकारकत्वाच्चौरः।

उत्तम पद प्राप्त होता है, इस सिद्धान्त से हे स्तुति करने वाले! अथवा नौ प्रकार की भक्ति करने से स्तुति करने से इसको देवत्व हुआ।

अथवा हे देव! हे मोदप्रिय देव लोक की अभिलाषा होने से इसको मोदप्रिय कहा गया है।

यद्वा हे देव! हे मदोन्मत्त! ईश्वर से विमुख होने पर केवल संसार के सुखों में प्रेम रखने से मदोन्मत्त अर्थ जानना चाहिये।

अथवा लोक प्रसिद्ध राजा ईश्वर है, स्त्री का आलिंगन करने से उत्पन्न सुख स्वर्ग है। मैं ही यथा शक्ति संसार के पदार्थों को करने वाला हूँ ईश्वर नहीं है स्वर्ग भी नहीं है इत्यादि नास्तिक विचार से मदयुक्त जानना चाहिये।

अथवा हे देव! हे शयन करने वाले मोक्ष को प्राप्त करने वाले मनुष्य शरीर को पाकर फिर भी उस प्रकार के अच्छे कर्म करने में उदासीन हो इस प्रकार शयन कर्तृत्व अर्थ जानना चाहिये। अथवा धर्म प्राप्त करने में निरपेक्ष होने से सोया हुआ यह जानना चाहिये।

यद्वा शरणागतानां स्मर्तॄणां च, अशुभकर्मसंहारकत्वाच्चौरः। तथाचोक्तमेकाक्षरकोषे। तकारः कीर्तिश्चौरे, इति। तथा, आदरः सर्वभविकजनैः पूज्यतयागृहीतः। पुनर्द्वयोर्द्वन्द्वे तादरौ तादरौ मम सत्वम्-अस्तित्वम्। भक्तमयम् हि इति निश्चयेन। तादरौ इत्यस्य सत्वेन विशेष्यविशेषण भावः। अजहल्लिंगता च वेदाःप्रमाणमितिवत्। ततश्चायमर्थः-सकलाशुभकर्मसंहारकारकमादरणीयं च ममास्तित्वं भक्तमयं भक्तस्वरूपम्। भक्तस्वरूपेणैव ममास्तित्वमवतिष्ठते। उक्तं हि—'नाहं वसामि वैकुण्ठे योगिनां हृदये न च मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद! च शब्द एवकारार्थः। तत्रैव तिष्ठामीत्यर्थः मद्भक्तेष्वेव मम स्थितिः। ततश्च मद्भक्तपूजनेऽहं पूजितो भवामि। मद्भक्ता मत्स्वरूपतयाऽवतिष्ठन्त इति तात्पर्यार्थः।

अथवा हे देवेति हे गमन शील उस प्रकार के कर्म करने से वार बार आवर्तन से बार बार जन्म मरण से संसार में भ्रमण करने वाले, स्वर्ग प्राप्ति होने पर भी पुण्यहीन होने पर मर्त्यलोक में प्रवेश करते हैं। इस प्रकार संसार में भ्रमणशील इसको, मोक्ष प्राप्ति न होने से जानना चाहिये। अपामसोममममृता अभूम इत्यादि श्रुति वल से अमृतत्व से मोक्ष प्राप्ति होती है इस प्रकार स्वर्ग प्राप्ति होने पर पुनः जन्म-मरण नहीं होता, यह ठीक नहीं। इस प्रमाण में अमृत पद का चिर काल स्थायी मात्र अर्थ है। यज्ञ से प्राप्त स्वर्ग जन्यपदार्थ होने से अनित्य है, मोक्षरूप नहीं है। केवल ज्ञान होने पर वा तत्व ज्ञान होने पर कर्मों के समूल नाश होने से कर्मो के अभाव रूप होनें में जीव को स्वयं ही अपने स्वरूप की प्राप्ति होती है, इस मत में नित्य ही मोक्ष है। श्रुति भी कहती है न स पुनरावर्तते इत्यादि। इस प्रकार सर्व सिद्धान्तो में यथेष्ट जान लेना चाहिये।

इस प्रकार उसको उन्मुख करके क्या कहती है, इस प्रकार तादरौ-त और आदर तादर है। त का अर्थ चौर है। सम्पूर्ण संसार को अपने में लय करने से चौर कहा गया। अथवा शरणागतों के और

यद्वा भजते, इति भक्, पुनरतिशये तमपि भक्तममिति । भक्तमम्, अतिशयेन सेवाकारकं याति प्राप्नोतीति भक्तमयम् । सेवाकारकाणां सविधे सर्वदा विद्यमानम् ।

यद्वा भक्तस्वरूपम्, तथा अयम्, स्थिरम् । न यातीति, अयम् । सर्वदा स्वस्थानस्थितमेव ममसत्वम् सर्वदा स्थिरमेव ।तत्रैव सर्वे लीयन्ते । न खलु मम सत्वं क्वचिदपि यातीत्यर्थः ।

यद्वा अयः शुभावहो विधिः । तत अर्शआदित्वादच् । अयं शुभप्रारब्धवदित्यर्थः । अथवा गत्यर्थकाद् या धातोः, 'आतोऽनुपसर्गे कः' इति कप्रत्ययः अं विष्णुं याति प्राप्नोतीत्ययम् । विष्णुप्राप्तम् । विष्णोः सत्वस्वरूपत्वान्मम सत्वं सत्वगुणस्वरूपमित्यर्थः ।

स्मरण करने वालों के अशुभ कर्मों को चोरने से चोर कहा गया । एकाक्षर कोष में कहा है कि तकार का अर्थ चोर है । इस प्रकार आदर का अर्थ है अच्छे जनों से पूज्यतया ग्रहण किया जाय । फिर दोनों का द्वन्द्व समास होने से तादरौ सिद्ध हुआ । मम् सत्वम् मेरा अस्तित्वम् । भक्तभयं हि, हि निश्चय अर्थ से है । तादरौ इसका सत्व से विशेष्य-विशेषण भाव सम्बन्ध है । और वेदाः प्रमाणम् के सदृश अजहल्लिंगता है ।

तो अर्थ हुआ कि सम्पूर्ण शुभ कर्मों का नाश करने वाला आदर के योग्य मेरा अस्तित्व भक्त स्वरूप है । भक्त स्वरूप से ही मेरा अस्तित्व स्थित है । कहा भी है--मैं न तो वैकुन्ठ में निवास करता हूँ न योगियों के हृदय में ही निवास करता हूँ, हे नारद--मेरे भक्त जहां मेरा गायन करते हैं मै वहीं निवास करता हूं । च शब्द का एक अर्थ है मेरे भक्तों में ही मेरी स्थिति है तो मेरे भक्तों की पूजा होने पर मेरी ही पूजा होती है । मेरे भक्त मेरे स्वरूप से ही स्थित हैं यह भाव हुआ । अथवा भज धातु से भक्त सिद्ध किया फिर अतिशय अर्थ में

कीदृशं मम सत्वमित्याह । 'भां' भां बीजस्वरूपम् अनन्ते विश्वमूर्तौ च वर्तते ! इति बीजकोषे । ततश्चायमर्थः —अनन्तं मम सत्वम्, इयत्ता-रहितमित्यर्थः । अथवा, अनन्तम्, नास्त्यन्तोऽवसानं यस्य तत्तथा । अवसानरहितम् । सर्वथा नित्यमेवेत्यर्थः । यद्वा भां विश्वमूर्तिस्वरूपम् । विश्वस्य ब्रह्मणश्चाभेद एव । ततश्च विश्वमूर्तिस्वरूपत्वे ब्रह्ममूर्तिस्वरूपत्वं स्वत एव प्रतीयते तथा च श्रुतिः । सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन इति । ततश्चायं फलितोर्थः । मम सत्वं ब्रह्मस्वरूपमेवेत्यर्थः । एवं च मम ममसत्वस्य, ब्रह्मणश्च, त्रयाणामैक्यमेव । अधिकारिभेदेन

तमयू क्रिया भक्तमम् हुआ । अतिशय करके सेवा करने वालों को जो प्राप्त हो उसको भक्तमय कहते हैं । सेवा करने वालों के पास सदा विद्यमान है ।

अथवा भक्तस्वरूप उसी प्रकार अयं जो स्थिर नहीं जाता जो उसको अयं कहते हैं । सदा अपने स्थान में ही स्थित मेरा सत्व है अर्थात सदास्थिर ही है। उसी में सब लीन होते हैं । मेरा सत्व निश्चय ही कहीं नहीं जाता है । अथवा शुभ धारण करने वाली विधि को अय कहते हैं । उससे अर्शादिअच किया तो अयं का अर्थ शुभप्रारब्ध वाला हुआ । अथवा गति अर्थ वाली या धातु से 'आतोऽनुपसर्गे कः' इस सूत्र से क प्रत्यय किया, अं विष्णु को याति प्राप्त करता है जो उसको अयम् कहते हैं । अर्थात विष्णु को प्राप्त । विष्णु के सत्वस्वरूप होने से मेरा सत्व सत्वगुणस्वरूप है । कैसा मेरा सत्व है यह कहा कि भां बीजस्वरूप अनन्त विश्वमूर्ति में है । यह बीज कोष में लिखा है । तो यह अर्थ हुआ कि अनन्त मेरा सत्व सर्वथा परिमाण रहित है । या अनन्त माने नहीं है अन्त जिसका उसको अनन्त कहते हैं । अर्थात अन्त रहित । सर्वथा नित्य है । अथवा भां माने विश्वमूर्ति स्वरूप, विश्व का और ब्रह्म का अभेद ही है, तो विश्वमूर्ति स्वरूप में ब्रह्ममूर्ति

ज्ञानवैषम्यात् किञ्चिद्भेदः प्रतीयते । वास्तविकविचारे ऐक्यमेवेति मत्स्वरूपं ब्रह्मस्वरूपमेवेत्यर्थः । अहं मत्सत्वं ब्रह्मचेति त्रयमप्येकमेव । अधिकारिभेदात्, भेदप्रतीतिः । क्रमशस्तथाविधज्ञानोदयाद्भेदप्रतीतिनाशे अभेदावगमो भवति । सर्वमेतत्तथाविधि श्रुतिबलात् कल्प्यते तथाहि—तत्त्वमसि—अत्र तत्पदेन ब्रह्मणो ग्रहणम् । त्वमित्यनेन जीवस्य ग्रहणम् । एवं च त्वं जीवस्तद्ब्रह्मस्वरूपमसि । अत्र वक्ताजीवो ब्रह्मचेति त्रयाणांप्रतीतिः ।

अथ ज्ञानोदयात् किञ्चिद्भेदप्रतीतिनाशे सोऽहमिति प्रतीतिर्जायते । अस्यां प्रतीतौ च सः अहं चेति द्वयमेव भासते । अथ पुनरज्ञानपटलनाशे भेदप्रतीतेर्नाशात्सर्वथा, अभेद एव प्रतीयते । ततश्च अहमेवेति प्रतीतिरूपजायते । तदेतत्सर्वमेवाभिप्रेत्योक्तम् मां विश्वमूर्तिस्वरूपं मत्सत्वम् । अहमेवविश्वस्वरूपमित्यर्थः पूर्वं संक्षेपतया प्रतिपादिनम् अत्र विशिष्य प्रतिपादने न पुनरुक्तत्वदोषोऽवगन्तव्यः इति ।

स्वरूप स्वयं प्रतीत है । श्रुति भी कहती है । यह सब निश्चय से ही ब्रह्म है, ब्रह्म से अतिरिक्त कुछ नहीं है । यह फलितार्थ हुआ कि मेरा सत्व ब्रह्म स्वरूप ही है । इस प्रकार मेरा मेरे सत्व का और ब्रह्म का इन तीनों का ऐक्य ही है । अधिकारी भेद से ज्ञान में वैषम्य होने पर कुछ भेद प्रतीत होता है । वास्तविक में एक ही है, मेरा स्वरूप ब्रह्मस्वरूप ही है । मैं मेरा सत्व और ब्रह्म तीनों एक ही हैं । अधिकारी भेद से भेद प्रतीति है । क्रमपूर्वक उस प्रकार के ज्ञान के उत्पन्न होने से भेद की प्रतीति नाश होने पर अभेद ज्ञान होता है । यह सब उस प्रकार की श्रुति गम्य है । जैसे तत्त्वमसि इसमें तत् पद से ब्रह्म का ग्रहण है और त्वम जीव का ग्रहण है । इस प्रकार तू जीव उसब्रह्म का स्वरूप है । यहां बोलने वाला, जीव और ब्रह्म तीनों की प्रतीति होती है । इसके अनन्तर ज्ञान के उदय होने पर भेद बुद्धि का नाश हो जाता है और सोऽहम् की प्रतीति होने लगती है । इस प्रतीति

यद्वा भामिति बीजं कालादिस्वरूपे। वर्तते। ततश्चायमर्थः। मम सत्वं कालादेस्स्वरूपं वर्तते। सकलसंहारकारकत्वान्मय्येव प्रलयेऽवस्थानम्। अथवा मम सत्वं कालस्वरूपम्। शिवस्वरूपमित्यर्थः। अथवा कालः समयः। तत्प्रवर्तकः सूर्यः। समयसमयप्रवर्तकयोरभेदोपचारात् तत्स्वरूपं ममसत्वमित्यर्थः एवं च सूर्यरूपम् तेजपुञ्जात्मकतया विद्यमानं ममसत्व-मितिभावः।

पुनः कीदृशं मम सत्वमित्याह, हां, हा, इतिविषादः, आम् ज्ञानं यस्मिन्निति हाम्। आपाततः परमात्मना सह ममाभेदास्तित्वज्ञाने साक्षा-त्स्वरूपानुपलब्धेर्निषादजनकत्वाद्विषादज्ञानवदित्यर्थः। अयं भावः —

में वह और मैं दोनों हो भासमान हैं। फिर अज्ञान समूह के नाश होने पर भेद की प्रतीति नाश होने से सर्वथा अभेद ही प्रतीत होता है। इसके अनन्तर मैं ही हूं यह प्रतीति उत्पन्न होती है। तो इन सब बातों को लेकर कहा कि 'भां' विश्वमूर्ति स्वरूप मेरा सत्व है, और मैं ही विश्वस्वरूप हूं।

अथवा भां यह बीज कालादि स्वरूप में है। तो यह अर्थ हुआ कि मेरा सत्व कालादि स्वरूप है। सम्पूर्ण संहार करने से मुझमें ही प्रलय स्थित है। अथवा मेरा सत्व काल स्वरूप है। अर्थात् शिव स्वरूप है। अथवा काल माने समय, उसका प्रवंतक सूर्य है। समय और समय के प्रवंतक में अभेदोपचार होने से उसका स्वरूप मेरा सत्व है। इस प्रकार सूर्य का रूप तेज का समूह, होने से विद्यमान मेरा सत्व है यह भाव हुआ।

फिर कैसा मेरा सत्व है—इस प्रकार हां, हा माने विषाद और आम् माने ज्ञान, है जिसमें, उसको हाम् कहते हैं। सर्व प्रकार से परमात्मा के साथ मेरा अभेदज्ञान होने पर साक्षात् स्वरूप की अनु-पलब्धि होने से विस्मय होने से विषाद ज्ञान वाला है यह अर्थ हुआ।

योगाभ्यासदशायाम्, अथवा मम दर्शनात् किञ्चिदज्ञानपटलनाशे प्रथमं कदाचित् किञ्चिन्मम स्वरूपसाक्षात्कारे पुनर्झटिति सर्वतो भावेन मत्स्वरूपानुलब्धेर्विषादजननात् इत्युक्तं विषादस्वरूपम् यद्वा हां दुखज्ञानस्वरूपम्। मत्स्वरूपदर्शने वैराग्योदयात् पुत्रकलत्रादीनां त्यागे तेष्वेव मोहोदयात् तेषां च वियोगदुःखजनकत्वात्, दुःखस्वरूपमित्यर्थः। 'हा विषादे च शोके च दुःखार्थेऽपि च कथ्यते' इति विश्वः।

यद्वा हः शिवः अकारो विष्णुः, तयोर्द्वन्द्वः, हौ। तयोः, आम्, सत्यतया ज्ञानं यस्मिन्निति हाम्। हरिहरस्वरूपमित्यर्थः। हः शिवे सलिले शून्ये धारणे मंगलेऽपि च। गगने नकुलीशे च रक्ते नाके च वर्तते, इति मेदनी। ततश्च यथायथं विभिन्नसिद्धान्तनीत्या सर्वसिद्धान्तेषु सम्बन्ध-

---

अभिप्राय यह है कि योगाभ्यास दशा में अथवा मेरे दर्शन से कुछ अज्ञान समूह नाश होने पर पहले कभी किंचित मेरे स्वरूप के साक्षातकार होने पर फिर शीघ्र ही सर्वतोभाव से मेरे स्वरूप की प्राप्ति न होने पर विषाद उत्पन्न होने से विषादस्वरूप कहा। अथवा हां दुःख ज्ञानस्वरूप है। मेरे स्वरूप के देखने पर वैराग के उत्पन्न होने से पुत्र स्त्री आदि का त्याग करने पर उन्हीं में प्रेम होने से उनके वियोग से दुःख उत्पन्न होने से दुःख स्वरूप है यह अर्थ हुआ। हा, विषाद शोक और दुःख अर्थ में भी है यह विश्वकोष में कहा है।

अथवा ह का अर्थ है शिव, अ का अर्थ है विष्णु। इन दोनों को द्वन्द्व समास होने से हा हुआ। उन दोनों का आम् माने सत्यता से ज्ञान है जिसमें उसको हाम् कहते हैं। अर्थात हरि हर स्वरूप है। ह, शिव, सलिल, शून्य, धारण, मङ्गल, गगन, नकुलीश, रक्त, और स्वर्ग अर्थ में है, यह मेदिनी कोष में लिखा है। तो यथेच्छ भिन्न भिन्न सिद्धान्तों की नीति से सर्वसिद्धान्तों में इसका सम्बन्ध कर लेना चाहिये। वह इस प्रकार कि ह शिव और आम् सत्यज्ञान रूप है

नीयम् । तच्चैवं ह शिवः आम्, सत्यज्ञानरूपं, यस्मिन्निति हाम् । शेते जगदस्मिन्निति सकलचराचरस्य लयस्थानमिति ब्रह्मस्वरूपं मम सत्व-मित्यर्थः ।

यद्वा हं सलिलम् आं ज्ञानं यत्रेति, आपोनारा इति प्रोक्ताः, इति पौराणिक प्रक्रियानुसारेण नारायणस्वरूपं मम सत्वमित्यर्थः ।

यद्वा हं शून्यम्, आम्, सत्यत्वेन प्रतीयमानं ज्ञातमित्यर्थोयस्मिन्निति हाम् । शून्यस्वरूपम् । शून्यस्वरूपेण संसारास्तित्ववादिबौद्धसिद्धान्तनये तथावगन्तव्यमित्यर्थः ।

यद्वा हं धारणं कच्छपवाराहरूपेण आं यस्मिन्निति । ब्रह्मणा निर्मितायाःपृथिव्या गोवर्धनस्य वा हं धारणां आं सत्यतया ज्ञातं यत्रेति कच्छप-वाराहकृष्णावतारस्वरूपं ममसत्वमित्यर्थः । एतेन पौराणिकसिद्धान्तनयोऽवग-न्तव्यः । तान्प्रत्युपदेशस्वरूपः फलितो भवतीति भावः ।

जिसमें उसको हाम् कहते हैं । सोता है संसार इसमें इस प्रकार संपूर्ण चराचर का लयस्थान ब्रह्मस्वरूप मेरा सत्व है ।

अथवा हं माने जल आ माने ज्ञान है जिसमें, "आपानारा इति-प्रोक्ताः" इस पौराणिक प्रक्रिया के अनुसार नारायण स्वरूप मेरा सत्व है ।

अथवा हं शून्य आम् सत्यत्वेन प्रतीयमान जाना यह अर्थ जिसमें हो उसको हाम् कहते हैं । अर्थात शून्यस्वरूप । शून्य स्वरूप से संसार को अस्तित्व मानने वाले बौद्धों के सिद्धान्त में यह जानना चाहिये । अथवा हं धारण, कच्छपवराह रूप से आम् जिसमें है उसको हाम्, कहते हैं । ब्रह्मा से निर्मित पृथ्वी का अथवा गोवर्धन पर्वत का हं धारण और आं सत्यतया ज्ञान है जिसमें उसको हां कहते हैं । कच्छप वराह कृष्णावतार स्वरूप में मेरा सत्व है । इससे पौराणिकों के सिद्धांत का नियम जान लेना चाहिये । उनके लिये उपदेश का स्वरूप फलित

यद्वा हं मंगलम्, आम्, सत्यत्वेन यत्रेति हाम्। आर्हतसिद्धान्ते हि प्रधानदशवैकालिकसूत्रे "धम्मोमङ्गलमुक्किट्ठोअहिंसा संयमो तवो" (धर्मो मङ्गलमुत्कृष्टोऽहिंसा संयमस्तपः) इत्युपक्रम्य, अहिंसादीनामुत्कृष्टधर्माणां मङ्गलत्वं स्वीकृतम्। पुनस्तत्रैव तद्व्याख्याने हरिभद्रसूरिभिः मगि धातुर्गत्यर्थे येन हितं तेन मङ्गलं भवति। यद्वा मङ्गो धर्मस्तं लाति ददत आदत्ते इत्येवं विविच्य अहिंसा संयमतपसां कारणं मङ्गलमिति निर्धारितम्। ततश्च—इद फलितं भवति, अहिंसासंयमतपःस्वरूपं मङ्गलस्वरूपं वा मम सत्वमित्यर्थः।

यद्वा हः नाकः आं यत्रेति हाम्। नाकस्वरूपमित्यर्थः। स्वर्गकामो यजेतेत्यादिप्रतिपादितस्वरूपं मम सत्वमिति भावः। एवं च तत्तत्सिद्धान्तानुयायिभिः स्वस्वसिद्धान्तानुसारेण तथा तथा कल्पनीयम्। एतदेव योगिनां वाण्यां अलौकिकत्वंम् यत्सर्वेषामपि हृदि सामानाकारेण स्वस्वाभिमतोऽर्थोऽवगम्यते। स्वस्वाभिमतदेवाराधनया अभीष्टसिद्धिरवश्यं

हो जाता है।

अथवा हं मंगल और आम् सत्यतया है जिससे उसको हाम् कहते हैं। आर्हत सिद्धान्त में प्रधान दश वैकालिक सूत्र में, उत्कृष्ट धर्म अहिंसा संयम और तप मंगल है, इस प्रकार कह कर अहिंसादि अच्छे धर्मों को मंगल स्वीकार किया है। फिर वहीं उसके व्याख्यान में हरिभद्रसूरि ने कहा है कि मगि धातु गति अर्थ में है जिससे कल्याण हो, उसको मंगल कहते हैं। अथवा मंग कहते है धर्म को। उसको जो स्वीकार करे और देवे, इस प्रकार विवेचना करके अहिंसा संयम और तप का कारण मंगल है, यह निश्चय किया। तो यह फलितार्थ हुआ कि अहिंसा, संयम और तप स्वरूप अथवा मंगल स्वरूप मेरा सत्व है।

अथवा ह स्वर्ग आं है जिसमें उसको हाम् कहते हैं। अर्थात स्वर्गस्वरूप। स्वर्ग की इच्छा वाला यज्ञ करे इत्यादि से प्राप्त स्वरूप मेरा सत्व

भविष्यति । क्षणेन भवेद्विलम्बेन वेति तु तथा भूतदेवसामर्थ्यंगम्यम् । तत्तदभीष्ट देवाराधनया तत्तत्कर्माचरणतो वा कियत्काल पर्यन्तं कुत्र स्थितिरित्यादि च सर्वं स्वस्वपुण्यबलात् स्वस्वदेवप्रभावाद् वा कल्पनीयम् । यद्यपि सर्वोऽपि लोकः स्वस्वदेवं स्वस्थानप्रापकं मन्यते तथापि तत्तत्स्थानप्रापकपुण्यभोगानन्तरमवश्यमेव पुनर्मर्त्यलोके गमनादकिञ्चित्करमेव तत् योगाभ्यासान्मम कृपातो वा सकलकर्मनाशे मोक्षे च कर्माभावात्किं कृतं जन्म स्यादिति विस्पष्टमेव । योगाभ्यासे देवीदेवपूजनादौ वा पुरुषाणां प्रवृत्तिः स्वस्वप्रकृत्यनुसारात् ।

एतदेवाभिप्रेत्योक्तम्—

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ।

कदाचिच्च सत्वरजस्तमसामुद्रेकाद् विभिन्नाऽपि प्रवृत्तिर्भवति । एवं

है यह भाव हुआ । इस प्रकार उन उन सिद्धांतो को मानने वाले अपने अपने सिद्धांतो के अनुसार वैसी वैसी कल्पना कर लें । यही योगियों की वाणी में अलौकिक चमत्कार है, जो कि सबके हृदय में समान भाव से अपने अपनें अभिमत अर्थों का ज्ञान हो जाता है । अपने अपने अभिलषित देवताओं की उपासना से मन वांछित सिद्धि अवश्य होगी । शीघ्र हो या बिलम्ब से हो यह तो उस देवता की शक्ति के अनुकूल है । उस उस अभिलषित देवता की उपासना से अथवा उस उस कर्म के करने से कितने समय तक कहां स्थिति है यह सब अपने अपने पुण्य के बल से अथवा अपने अपने देवता के प्रभाव से कल्पना कर लेनी चाहिये । यद्यपि सब लोग अपने अपने देवता को

च यद्देवस्याराधनं क्रियते तद्देवस्यैवस्थाने ष्याराधकेन गम्यते, उक्तमेवैतद् यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः। भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि मां। एवं स्वाभीष्टदेवाराधनायामपि आराधनाया उत्तममध्यमाधमभेदात् सायुज्यसारूप्यसामीप्यमुक्तिरवगन्तव्या वस्तुतस्तु ब्रह्मणो ब्रह्मस्वरूपान्मत्तोऽतिरिक्तानां देवानां विषयेषु वास्तविकमुक्तेरभावात्पुनरागमनमेवेति स्वयमेव विद्वद्भिरवगन्तव्यमिति।

पुनः किं विशिष्टं मम सत्वमित्याह—हिं-हिंकारस्वरूपम्। हिंकारो हि अप्रतिषेधव्रतस्वरूपः। तच्चैवमुपपद्यते, यदेव कश्चिद् याचेत तदेव दद्यात्। नह्यत्र किञ्चिदपि विचारयेत्। इदं च सर्वसिद्धान्तेषु समानतयोन्नेयमिति।

उस देवता के स्थान में पहुँचाने वाला मानते हैं, तो भी उस देवता के स्थान में प्राप्त पुण्य को भोगने के अनन्तर अवश्य मर्त्यलोक में आना पड़ेगा, इसलिए यह अकिंचित है, अर्थात निस्तत्व है। योगाभ्यास से अथवा मेरी कृपा से सब कर्मों के नाश होने पर मोक्ष होने से कर्मों के अभाव होने पर जन्म-मरण से छूट जाता है यह स्पष्ट ही है। योगाभ्यास से देवी अथवा देवता की पूजा में पुरुषों की प्रवृत्ति अपनी अपनी प्रकृति के अनुसार है। इसी बात को लेकर कहा है कि—कोई त्रयी माने वैदिक मत को मानते हैं, कोई सांख्ययोग को मानते हैं, कोई शैव मत को मानते हैं, कोई वैष्णव मत को मानते हैं, इस प्रकार भिन्न भिन्न मार्ग हैं। कोई किसी मार्ग को अच्छा बतलाता है कोई किसी मार्ग को अच्छा बतलाता है, क्योंकि अपनी अपनी रुचि भिन्न है। जिस प्रकार सब जल समुद्र को प्राप्त होता है इसी प्रकार सीधे टेढ़े और अनेक मार्ग से सेवा करने वाले मनुष्य केवल आपको ही प्राप्त करते हैं। कभी सत्व रज और तमोगुण के भेद से विभिन्न प्रवृत्ति भी होती है। इस प्रकार जिस देव की

पुनः किं विशिष्टं मम सत्वमित्याह—ह्रौं, ह्रौं बीजस्वरूपम् । ह्रौमिति शिवबीजरूपम् । शेते जगदस्मिन्निति शिवः । सकलचराचरस्य लयस्थानत्वेन ब्रह्मस्वरूपमित्यर्थः । अथवा शिवः आशुतोषो भगवान् गौरीशंकरस्तत्स्वरूपं मम सत्वमित्यर्थः । एतेन शैवमतमवगन्तव्यम् । अथवा शिवं कल्याणम्, तत्स्वरूपं मम सत्वम् । एतेन मोक्षसाधकसांख्यार्हतादिमतानां ग्रहणं बोध्यम् । मोक्षसाधकसिद्धान्तस्यैव कल्याणकरत्वमवगन्तव्यम् ।

यद्वा ह्रौमिति प्रसादबीजम् मम सत्वं सर्वदा प्रसादस्वरूपम् । अथवा प्रसन्नताया जनकम् । मम मत्सत्वेन सहाभेदात् सत्वस्वरूपान्मत्तः प्रादुर्भूतेषु चराचरेषु प्रसन्नतायाः प्रादुर्भावो भवतीत्यर्थः । अयं भावः । मम सच्चिदानन्दत्वेन मत्तो जायमानस्य चराचरस्य आनन्दमयत्वमव्याहतमेव ।

उपासना भक्त करता है, उसी देवस्थान को भक्त जाता है । गीता के ९ वें अध्याय के २५ श्लोक में भगवान भी स्वयं कहते हैं । देवताओं के भक्त देवलोक को जाते हैं । पितरों के भक्त पितृलोक को जाते हैं । भूतों की आराधना करने वाले भूतों को प्राप्त होते हैं, और मेरी उपासना करने वाले मुझको ही प्राप्त होते हैं । इस प्रकार अपने अभिलषित देवता की उपासना में भी उपासना के उत्तम, मध्यम, अधम भेद से सायुज्य सारूप्य सामीप्य मुक्ति जान लेनी चाहिये । वास्तविक में ब्रह्म से अथवा ब्रह्म स्वरूप मुझसे अतिरिक्त देवताओं के विषय में वास्तविक मुक्ति का अभाव होने से फिर जन्म लेना अवश्य ही होगा यह विद्वान लोग स्वयं जान लें ।

फिर कैसा मेरा सत्व है कि ह्रिं ह्रिंकार स्वरूप । ह्रिंकार है रुकावट रहित व्रत स्वरूप । उसका उपपादन इस प्रकार किया गया है कि, जो कोई जो कुछ मांगे उसको वही देवे, इसमें कुछ भी विचार न करे । यह सब सिद्धांतों में समान भाव से जान लेना चाहिए ।

फिर कैसा मेरा सत्व है कि 'ह्रौं' ह्रौं बीज स्वरूप । ह्रौं यह शिव-

पुनः कीदृशं मम सत्वमित्याह हं हं स्वरूपम् । हमिति परमात्मनो बोधकम् । ततश्चायमर्थः परमात्मस्वरूपं मम सत्वमस्ति । एतेन परमात्मनोऽभिन्नं मम सत्वं वर्तत इति भावः ।

यद्वा हमिति हंसस्वरूपम् जीवस्वरूपं मम सत्वमस्तीत्यर्थः । जीवस्य परमात्मन एव स्वरूपत्वात्परमात्मनोंऽशत्वाद्वा अंशांशिभावेन कल्पनीयम् । एतेन अद्वैतविशिष्टाद्वैतमतादीनामनुसरणं कृतं भवति । हंस इति जीवस्य संज्ञा । तथा चोक्तं नैषधे श्रीहर्षेण हंसं तनौ सन्निहितं चरन्तमित्यादि ।

यद्वा हमिति शिवस्वरूपम् कल्याणस्वरूपमित्यर्थः एतेन मोक्षस्वरूपकल्याणसाधकानाम् अद्वैतार्हतादिमतानाम् ग्रहणनावगन्तव्यम् ।

यद्वा हमिति व्योमस्वरूपम् शून्यस्वरूपमित्यर्थं । एतेन शून्यवादिनां बौद्धानां ग्रहणं कृतं भवति ।

बीज रूप है । संसार इसमें सोता है इसलिए इसको शिव कहते हैं । संपूर्ण चराचर का लयस्थान होने से शिव ब्रह्मस्वरूप है, अथवा शिव माने शीघ्र प्रसन्न होने वाले भगवान गौरीशंकर मेरा सत्व है । इससे शैव मत भी जान लेना चाहिये । अथवा शिव माने कल्याण स्वरूप मेरा सत्व है । इससे मोत्तसाधक सांख्य अर्हतादिकों के मत का ज्ञान कर लेना चाहिये । मोच को सिद्ध करने वाले सिद्धान्त को ही कल्याण करने वाला जानना चाहिये ।

अथवा ह्रौं यह प्रसाद बीज है । मेरा सत्व सदा प्रसन्न स्वरूप है । अथवा प्रसन्नता को उत्पन्न करने वाला है । मेरा मेरे सत्व के साथ अभेद होने से सत्वस्वरूप मुझसे उत्पन्न होने वाले चराचरों में प्रसन्नता प्राप्त होती है । भाव यह है कि मेरे सच्चिदानन्द स्वरूप होने से मुझसे उत्पन्न होने वाले चराचर की आनन्दमयता निश्चित ही है ।

फिर कैसा मेरा सत्व है कि, 'हं' हंस्वरूप । हं यह परमात्मा का बोधक है । तो यह अर्थ हुआ कि परमात्मास्वरूप मेरा सत्व है । इससे

यद्वा हमिति कविः। कविर्विद्वान्। ततश्च ममसत्वं विद्वत्स्वरूपमित्यर्थः। एतेन सदसद्विवेककारित्वम् मदुपासनया मत्सत्वप्राप्तिर्भवतीत्यनगन्तव्यम्। विद्वानेव देव इति सामाजिकाः।

यद्वा हमिति कूटस्थमुच्यते। ततश्च कूटस्थं पुरुषस्वरूपं मम सत्वं पुष्करपलाशवन्निर्लेपमित्यर्थः। उक्तं हि मूलप्रकृतिविकृतिर्महाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः। एतेन प्रकृतिविकृतिरहितं कूटस्थं पुरुषस्वरूपं मम सत्वमिति सांख्यसिद्धान्त उन्नीतो भवति।

यद्वा हमिति कोपनिवारणम् इति वर्णबीजप्रकाशे उक्तम्। ततश्च कोपो निवार्यतेऽनेनेति कोपनिवारणम्। करणाधिकरणतश्चेति करणे ल्युट्। मम सत्वप्रभावाच्छत्रवोऽपिवश्या भवन्ति। अथवा ममोपासनया

यह अभिप्राय हुआ कि परमात्मा से अभिन्न मेरा सत्व है। अथवा 'हं' यह हंसस्वरूप है। जीवस्वरूप मेरा सत्व है यह अर्थ हुआ। जीव परमात्मा का ही होने से अंश और अंशीभाव की कल्पना कर लेनी चाहिये। इससे अद्वैत और विशिष्टाद्वैत का अनुसरण किया गया है। हंस यह जीव की संज्ञा है। नैषध में श्रीहर्ष ने भी 'हंसं तनौ सन्निहितं चरन्तम्' इत्यादि कहा है।

अथवा 'हं' यह शिवस्वरूप कल्याण स्वरूप है। इससे मोक्ष स्वरूप कल्याणसाधक अद्वैत अर्हतादिकों का मत जान लेना चाहिये।

अथवा हं यह आकाश स्वरूप है। अर्थात शून्य स्वरूप। इससे शून्य वादि बौद्धों का ग्रहण किया है।

अथवा हं का अर्थ है कवि। कवि माने विद्वान। तो यह अर्थ हुआ कि मेरा सत्व विद्वत्स्वरूप है। इससे भले बुरे विचार करने वाली मेरी उपासना से मेरे सत्व की प्राप्ति होती है, यह जान लेना चाहिए। विद्वान ही देवता है यह सामाजिक मत भी है।

अष्टविधिसिद्धियुक्तः स जायते तेन तत्समक्षं प्राप्तस्य पुरुषस्य स्वत एव वैरमुपशाम्यति ! अहिनकुलस्य गोव्याघ्रस्यापि परस्परं तत्र वैरभावो न भवति, किमित पुरुषस्य। एतेन मम सत्वप्रभावसिद्धस्य योगिराजस्य समक्षं कोपनिवारकत्वेन योगसाधकं मम सत्वमित्यवगन्तव्यमिति दिक्।

अथ पुनस्तमेव सत्वं विशिनष्टि। पुनः कीदृशं मम सत्वमित्याह। ह्रीमिति ह्रीमिति अप्रतिषेधव्रतस्वरूपम्। अत्र अप्रतिषेधव्रतस्वरूपयोर्ह्रस्वदीर्घयोर्हिंकारह्रींकारयोग्रहणाल्लघुकालिकं दीर्घकालिकं चेतदित्यवगन्तव्यम्। उभयथाऽपि तथाभूतव्रतपतिपालने ह्रस्वदीर्घयोः सिद्ध्योः समुपलम्भात्। अत्र ह्रस्वहिंकारग्रहणेनेदं बोध्यते। यत् स्वल्पकालिकतथाभूत व्रतग्रहणेन स्वल्पकालावस्थायिनी स्वल्पदेशावस्थायिनी वा सिद्धिरूपजायते। अथवा ह्रस्वा क्षुद्रा सिद्धिरूपलभ्यते। यथा कस्यचिद्विनष्टस्य वस्तुनः

अथवा हं कूटस्थ को कहते हैं। तो कूटस्थ पुरुषस्वरूप मेरा सत्व कमल के पत्ते के समान निर्लेप है। कहा भी है कि मूल प्रकृति विकार रहित है। और महदादि सात किसी की प्रकृति हैं और किसी की विकृति हैं। सोलह तत्व विकारयुक्त हैं, पुरुष न तो प्रकृति है और न विकृति है। इससे प्रकृति विकृति रहित कूटस्थ पुरुष स्वरूप मेरा सत्व है, इस प्रकार सांख्य सिद्धान्त उपस्थित हो जाता है।

अथवा हं का अर्थ है क्रोध को छोड़ना, यह वर्णबीज प्रकाश में कहा है। तो कोपनिवारण किया जाय जिससे उसको कोपनिवारण कहते हैं। करणाधिकरणयोश्च सूत्र से ल्युट् होता है। तो अभिप्राय यह हुआ कि मेरे सत्व के प्रभाव से शत्रु भी वश में हो जाते हैं। अथवा मेरी उपासना से अणिमादि आठो सिद्धियों से युक्त मनुष्य होता है। उससे उसके पास उपस्थित हुए पुरुष का वैर आप ही शान्त हो जाता है। सांप नेवला और गौव्याघ्र का भी परस्पर वैर भाव नहीं होता है तो पुरुषों का होना ही क्यों है। इससे मेरे सत्व

पुनः प्राप्तिः पुत्रधनादिवरप्रदानं चेत्यादि। एवमेव दीर्घह्रींकारग्रहणेनेद-मवगम्यते। यद् दीर्घकालिकतथाभूतव्रतग्रहणेन दीर्घकालिकी अपरिमित-देशावस्थायिनी च सिद्धिरुपलभ्यते। अथवा दीर्घह्रींकारेण दीर्घा महती सिद्धिरुपलभ्यते। यथा अन्यस्यापि अभ्यासाद्यभावेऽपि ईश्वरसाक्षात्कारः बाह्येन्द्रियाग्राह्यवस्तुसाक्षात्कारो वा कार्यते। यथा गीतायां श्रीकृष्णार्जुन संवादे दिव्यम् ददामि ते चक्षुः पश्य मे योगमैश्वरम् इत्यादिनार्जुनाय श्रीकृष्णेन तथाभूतचक्षुः प्रदानं विहितम् अद्य श्वः कलिकालसमयेऽपि परमयोगिराजैः श्री १०८ श्रीरामकृष्णस्वामिभिर्विवेकानन्दाय तथाभूत-शक्तिप्रदानं कृतम्, येन परमां चमत्कृतिमापन्नः स सर्वज्ञकल्पः संजातः तत्रैवमासीत एकदा विवेकानन्दः परमनास्तिक आङ्गलभाषाविद्वान् युक्तिप्रवीणोऽनीश्वरवादी वङ्गप्रदेशे आसीत। न तद्युक्तिसमुत्तरणे महामहो-

---

के प्रभाव से सिद्धयोगीराज के समक्ष क्रोध की निवृत्ति होने से योग को सिद्ध करने वाला मेरा सत्व यह जान लेना चाहिये।

इसके अनन्तर फिर उसी सत्व का विस्तार करता है, कि कैसा मेरा सत्व है। ह्रीमिति ह्रीं यह निषेध रहित व्रतस्वरूप है। यहां अप्रतिषेध व्रतस्वरूप ह्रस्व ह्रिंकार और दीर्घ ह्रींकार को ग्रहण करने से यह लघुकालिक और दीर्घकालिक है यह जान लेना चाहिए। दोनों ओर से उस प्रकार के व्रत के पालन करने से छोटी और बड़ी सिद्धि प्राप्त होती है। यहां ह्रस्व ह्रिंकार ग्रहण करने से यह ज्ञान होता है कि थोड़े समय उस प्रकार के व्रत करने से थोड़े समय तक स्थिर रहने वाली छोटे देश में रहने वाली सिद्धि प्राप्त होती है। अथवा ह्रस्व माने क्षुद्र सिद्धि प्राप्त होती है। जैसे कि किसी खोई हुई वस्तु का मिल जाना, और पुत्र धन आदि का बर मिल जाना आदि, इसी प्रकार दीर्घ ह्रींकार की ग्रहण से यह जाना जाता है कि बहुतसमय तक उस प्रकार के व्रत करने से बहुसमय वाली और अपरिमित देश में रहने वाली सिद्धि प्राप्त होती है। अथवा दीर्घ ह्रींकार से

पाध्यायप्रभृतयो महान्तो विद्वांसः समर्थाः समभवन् । स च कदाचिद्वि-
लासमात्रेण श्रीरामकृष्णस्वामिसन्निधे समगमत । उपविष्टश्च स तत्समक्षं
यदेव मनसि प्रष्टुं कल्पते तदेव समुत्तरितुमिवावगच्छति । अथ स
स्वामिनमीश्वरसाक्षात्कारमेव प्रार्थयामास । तदनन्तरमपरेद्युराहूतः स तेन
परमयोगिराजेन श्री रामकृष्णस्वामिना तल्ललाटे स्वाङ्गलिस्पर्शमात्रे-
णैव समुद्बोधितो विवेकानन्दः करामलकमिव प्रत्यक्षमेव सकलमपि
चराचरं परमात्मानं चापश्यदित्यलमत्र बहूक्तेन । आर्हतदर्शने च
स्वल्पदेशावस्थायिना, अपरिमितदेशावस्थायिनी चेयमेव सिद्धिः अवधि-
ज्ञानसमुद्भूताऽप्रतिपातिनी कारणवशाच्च प्रतिपाति–नीचोक्ता ।

दार्थ सिद्धि प्राप्त होती है । जैसे कि दूसरे को भी अभ्यास का अभाव
होने पर ईश्वर का साक्षात्कार होता है । अथवा बाह्य इन्द्रियों से
ग्रहण न होने योग्य वस्तु का साक्षात्कार कराया जाता है । जैसे कि
गीता में श्री कृष्ण और अर्जुन के संवाद में "मैं दिव्य नेत्र तुझको
देता हूं इससे तू मेरा ईश्वरी योग देख" इत्यादि से भगवान् श्री
कृष्ण ने अर्जुन के लिए उस प्रकार का दिव्य नेत्र दिया है । आजकल
कलिकाल के समय में भी योगीराज श्री मान् १०८ स्वामी रामकृष्ण
जी ने श्री विवेकानन्द जी के लिए उस प्रकार की शक्ति दी जिससे
उत्तम चमत्कार को प्राप्तकर वह सर्वज्ञ हुए । परमनास्तिक अंग्रेजी के
विद्वान् युक्ति में चतुर ईश्वर को न मानने वाले विवेकानन्द जी एक
समय बङ्गाल में थे । उनकी युक्ति को खण्डन करने में महामहो-
पाध्याय आदि बड़े विद्वान् भी समर्थ न हो सके । वह किसी दिन
विलासमात्र से श्री स्वामी रामकृष्ण जी के पास गये और बैठ गये ।
विवेकानन्द जी श्री स्वामी रामकृष्ण के सामने जो कोई प्रश्न पूछने को
मन में विचारते थे उसका उत्तर पहले ही उनको मिल जाता था ।
इसके अनन्तर विवेकानन्द जी ने स्वामी रामकृष्ण जी से ईश्वर के
साक्षात्कार की प्रार्थना की । इसके अनन्तर योगीराज स्वामी रामकृष्ण

नोट—अयं विवेकानन्दः स्मृत्याचारपुराणादिपरिपन्थिनः श्राद्धतीर्थप्रतिमापूजाविद्वेषिणोऽर्द्धनास्तिकाद्भिन्न एव । येन गीतोक्तिप्रवचनमात्रेणैव सहस्रशोऽमरीकानिवासिनः पाश्चात्या सनातनधर्मानुयायिनो विहिता इति नातितिरोहितंविदुषामिति।

योगमार्गानुसारिभिरन्यैश्च मतिश्रुत्यवधिमनःपर्यायकेवलज्ञानवादिभिरवधिज्ञानगता एवमेव समर्थितेत्यलमत्र बहूक्तेन । ह्रीमित्यादौ ह्रस्वो विभक्तिलोपश्चवर्णबीजत्वात् छान्दसत्वात्' तत्समुदायमात्रस्य तदर्थवाचकत्वाद्वा न भवति ।

पुनः किंविशिष्टं ममसत्वमित्याह । वम् इति । वं बीजस्वरूपम् वमिति वरुणबोधकम् । ततश्च च वरुणस्वरूपं मम सत्वमित्यर्थः । एवं च शैत्यपावनत्वादिगुणविशिष्टस्य जलस्याधिपतिरिव सकलचराचर-

---

जी ने विवेकानन्द जी को दूसरे दिन बुलाया और उनके मस्तिक पर अपनी अंगुलि का स्पर्श किया, स्पर्शमात्र से ही विवेकानन्द जी उद्बोधित होगये, और सम्पूर्ण चराचर तथा ईश्वर को हाथ के खिलौने समान प्रत्यक्ष ही देखने लगे, इसमें इतना ही कथन काफी है । आर्हत दर्शन में स्वल्प देश में तथा अपरिमित देश में रहने वाली यह सिद्धि अवधि ज्ञान से उत्पन्न अप्रतिपातिनी और कारण वश से प्रतिपात्तिनी है

नोट—यह विवेकानन्द स्मृति आचार और पुराणों के विरुद्ध श्राद्ध तीर्थ और मूर्तिपूजा का द्वेषी अर्धनास्तिकों से भिन्न विचार वाला था । जिसने गीता के प्रवचनमात्र से ही हजारों अमरीका निवासियों के पाश्चात्य सनातन धर्म को मानने वाले बनाये । यह बात विद्वानों से छिपी हुई नहीं है ॥

योगमार्ग को मानने वाले और अन्य मति श्रुति अवधि मन पर्याय और केवल ज्ञान वादियों ने अवधिज्ञान गत हो इसका समर्थन किया है ।

वस्तुस्तोमं तथाभूतगुणविशिष्टं विदधन्मम सत्वं वर्तते । एतेन शैत्यपावने विधाने सत्वस्य सामर्थ्यातिशयो द्योत्यते ।

यद्वा थं विष्णुस्वरूपम् । ततश्च वेवेष्टीति विष्णुः । एवं च सर्वत्र व्याप्तं सकलेष्वपि पदार्थेषु अन्तःप्रविश्यापि मम सत्वं वर्तत इत्यर्थः. अथवा विष्णुवदाराध्यो भक्तिगम्यश्चेत्याशयः ।

यद्वा वमिति अमृतस्वरूपं मम सत्वम् । एतेन मृत्युनाशकत्वमवगम्यते । अयं भावः लौकिकानां पुत्रकलत्रादिप्रियाणां मृत्युनाशकत्वाद् दीर्घायुः प्रापकमिति । अथवा तदुपासनया तद्ध्यानाद्वा जीवो ह्यमृतीभवति । एतेन सायुज्यमोक्षसाधकं मम सत्वमित्वमगम्यते । तत्रैव जीवप्राप्तौ वास्तविकामृतीभावात् । अथवा । 'अपामलोममृता अभूम' इत्यादौ अमृतस्वरूपेण देवत्वमवगम्यते । ततश्च मम सत्वं देवस्वरूपमेवेत्यर्थः ।

हीम् इसमें ह्रस्व और विभक्तिलोप वर्णवीज और वैदिक होने से उस समुदायमात्र को तदर्थ वाचक होने से नहीं होता है ।

फिर कैसा मेरा सत्व है कि वं बीजस्वरूप युक्त। वं यह वरुण का बोधक है। तो यह अर्थ हुआ कि वरुण का बोधक मेरासत्व है । इस प्रकार शीत पवित्र आदि गुणयुक्त वरुण के समान संपूर्ण चराचर वस्तुसमूह को उसप्रकार के गुणों से युक्त करने वाला मेरा सत्व है । इससे शैत्य और पवित्र करने में सत्वका सामर्थ्य प्रकट होता है । अथवा वं विष्णुस्वरूप है । जो प्रवेश करता है उसको विष्णु कहते हैं । इस प्रकार सब जगह व्याप्त संपूर्ण पदार्थों में प्रवेश कर मेरा सत्व ही विद्यमान है । अथवा विष्णु के समान आराध्य भक्ति से प्राप्त होने वाला मेरा सत्व है ।

अथवा वं माने अमृत स्वरूप मेरा सत्व है । इससे मृत्यु को नाश करने वाला जानाजाता है । भाव यह है कि लौकिक पुत्र स्त्री आदि प्रिय जनों की मृत्यु को नाश करने से दीर्घायु को देने वाला है । अथवा

मदुपासनया मत्सत्वप्राप्तौ देवत्वप्राप्तिः स्वत एव प्रतीयते । एतेन मीमांसकानां मतमुन्नीतं भवति ।

यद्वा वमिति अपराजितस्वरूपम् । ततश्च न पराजितमित्यपराजितम् । मम सत्वं न केनाप्यत्रस्कन्दितुं योग्यमिति तदाशयः । एतेन महासत्वं मम सत्वमित्यर्थः । अथवा अपराजिता विद्येव अपराजितं मम सत्वम् । एवं च युद्धादिषु कार्येषु विजयप्रापकमिति तात्पर्यार्थः ।

यद्वा वमिति इन्दुस्वरूपम् । एवं च चन्द्रवत्सकलजनानामाह्लादजनकं मम सत्वमित्यर्थः । अथवा ममोपासनया आह्लादजनकता शक्तिः पुरुषेषूपपद्यत इति । यद्वा वमिति ककुत्स्वरूपं मम सत्वम् । सर्वश्रेष्ठमित्यर्थः । तदुपासनया च सर्वश्रेष्ठो ममोपासको लोकेषु संज्ञायते ।

उसकी उपासना सेवा ध्यान से जीव अमृत हो जाता है। इससे सायुज्यमोक्षको सिद्ध करने वाला मेरा सत्व है यह सिद्ध हुआ। वही जीव की प्राप्ति में वास्तविक अमृत का अभाव होने से अथवा अपाम-सोम इत्यादि में अमृत स्वरूप से देवत्व माना गया है। तो मेरा सत्व देवरूप है। मेरी उपासना से मेरे सत्व को प्राप्ति होने पर देव-की प्राप्ति स्वयं सिद्ध है। इससे मीमांसको का मत भी स्वीकृत हो जाता है।

अथवा वं यह अपराजित स्वरूप है। तो जो पराजित नहीं हैं उसको अपराजित कहते हैं। भाव यह है कि मेरे सत्व का उल्लङ्घन कोई नहीं कर सकता है। इससे महासत्व मेरा सत्व है यह अर्थ हुआ अथवा अपराजिता विद्या के समान मेरा सत्व अपराजित है। इस प्रकार युद्धादि कार्यों में विजय प्राप्त करने वाला मेरा सत्व है।

अथवा वं यह चन्द्र स्वरूप है। इस प्रकार चन्द्रमा के समान सबको प्रसन्न करने वाला मेरा सत्व है। अथवा मेरी उपासना से

यद्वा वमिति करुणम्। कारुण्ययुक्तं मम सत्वमित्यर्थः। तेनैव सर्वलोकस्योद्धाराय सर्वदा यतते।

यद्वा वमिति वेदसंज्ञकम्। एतेन ज्ञानमयं ज्ञानप्रापकं वा मम सत्वमस्तीत्यर्थं; । अथ पुनस्तमेव विशिनष्टि। पुनः कीदृशं मम सत्वमित्याह—

लमिति। लमिति बीजं पृथ्वीस्वरूपम्। एतेन सर्वसहत्वं सकल- दुष्टेषु क्षमाकारकत्वं मम सत्वस्यास्तीति भावः।

यद्वा लमिति विमलबीजम्। एतेन सर्वदोषराहित्यं मम सत्वेऽ स्तीति गम्यते एवं च सर्वतो निर्मलं मम सत्वम्। न खलु तत्र रजस्तमोमलानां संसर्गोऽ प्यस्तीति तदाशयः।

यद्वा लमिति वेदार्थसारः। वेदानामर्थस्य सारभूतं मम सत्वम् एतेन ओम् स्वरूपं वा यज्ञस्वरूपं वा मम सत्वमस्तीति भावः।

आह्लादजनकता शक्ति पुरुषों में उत्पन्न होती है। अथवा वं यह ककुद स्परूप मेरा सत्व है। अर्थात् सर्व श्रेष्ठ है। उसकी उपासना से लोक में सर्व श्रेष्ठ मेरा उपासक होता है।

अथवा वं यह करुण स्वरूप है। करुणा से युक्त मेरा सत्व है। उससे सब लोक के उद्धार के सदा यत्न करता है।

अथवा वं यह बेद संज्ञक हैं। इससे ज्ञानमय और ज्ञान को देने वाला मेरा सत्व है। फिर उसीको बताता है कि कैसा मेरा सत्व है कि लमिति लं यह बीज पृथ्वी रूप है। इससे सब सहन करने वाला सब दुष्टों पर क्षमा करने वाला मेरा सत्व है।

अथवा लं यह विमल बीज है। इससे सब दोषों से रहित मेरा सत्व है। इस प्रकार निर्मल मेरा सत्व है। भाव यह है कि उसमें रजो- गुण और तमोगुण से उत्पन्न होने वाले दोषों का संबन्ध नहीं है।

यद्वा त्वमिति अमोघम् । अवश्यफलप्रापकम् । ममोपासना कदाचिदपि न निष्फला भवतीत्यर्थः ।

यद्वा त्वमिति ऋद्धिस्वरूपम् । सर्वविधसमृद्धिप्रापकम् । एतेन लौकिकपुत्रपौत्रधनधान्यादिसर्वविधऋद्धिप्रापक मम सत्वमस्तीति प्रतीयते ।

यद्वा त्वमिति इन्द्रः । इदिपरमैश्वर्ये । इन्दनात् इन्द्रः । परमैश्वर्यवत् मम सत्वमित्यर्थः अथवा इन्द्रपदस्य देवाधिपतेरिन्द्रस्य वाचकत्वादभेदसंसर्गेण सत्वेन सह बाधात् इन्द्रपदस्य इन्द्रसदृशे लक्षणा । ततश्चायमर्थः । इन्द्रसदृशं मम सत्वम् । सादृश्यं च अधिपतित्वेनैव, तत एतदायातम् । देवाधिपत्यमिव सकलचराचरेषु मम सत्वस्याधिपत्यमस्तीति ।

यद्वा त्वमिति कन्दबीजम् । ततश्च सकलचराचरस्य मूलभूतं मम सत्वमित्यर्थः । एतेन सर्वमूलाधारकत्वं सत्वस्य व्यज्यते ।

अथवा त्वं यह वेद के अर्थ का तत्व है । वेदों के अर्थ का सार-भूत मेरा सत्व है । इससे ॐ स्वरूप वा ब्रह्मस्वरूप मेरा सत्व है । अथवा त्वं यह अमोघ स्वरूप है । फल को अवश्य देने वाला है । मेरी उपासना कभी निष्फल नहीं हो सकती है यह अर्थ हुआ ।

अथवा त्वं यह ऋधि स्वरूप है । सब प्रकार से समृद्धि को देने वाला है । इससे लौकिक पुत्र पौत्र धन और धान्य आदि सर्व प्रकर की ऋद्धि को देने वाला मेरा सत्व है ।

अथवा त्वं यह इन्द्र का वाचक है । इदि परमैश्वर्ये धातु से इन्दनात् इस व्युत्पत्ति से इन्द्र हुआ । अर्थात् परम ऐश्वर्य वाला मेरा सत्व है । अथवा इन्द्रपद देवताओं के राजा इन्द्र अर्थ में विद्यमान है, अभेद सम्बन्ध से सत्वके साथ बाध होने से इन्द्रपदकी इन्द्रसादृश्य में लक्षणा की. तो यह अर्थ हुआ कि इन्द्र के समान मेरा सत्व है । समा-

पुनः कथं भूतं मम सत्वमस्तीति विशिनष्टि।

यमिति यं बीजस्वरूपम् । यमिति वायुः । वातीति वायुः । सर्वत्र गतिमत् । वायुबदप्रतिहतगतियुक्तम् ।

यद्वा यमिति काली । कालीव दुष्टानां विनाशने विकरालस्वरूपं । एतेन दुष्टानां नाशकत्वं शिष्टानां पालकत्वं च मम सत्वस्यास्तीति भावः ।

यद्वा यमिति पुरुषोत्तमस्वरूपम् । पुरुषात् उत्तमं पुरुषोत्तमम् न प्रकृतिर्न विकृतिः पुरुष.' इति प्रकृतिविकृतिभिन्नात्कूटस्थाज्जीवादति उत्तम मम सत्वम् । एतेन ब्रह्मस्वरूपत्वमस्येत्यवगम्यते ।

यद्वा यमिति युगान्तशासनस्वरूपम् । युगान्तस्य शासनं शासनभूतम् युगानामन्तकर्त्रकमित्यर्थः । अथवा युगान्ते खण्डप्रलये महाप्रलये वा शासनमस्येति युगान्तशासनं । महाप्रलयेपि प्रधानभूतमेवेत्यर्थः ।

नता अधिपति संबन्ध से है। तो यह अर्थ आजाता है कि देवताओं के अधिपति के समान संपूर्ण चराचरों में मेरे सत्त्व का आधिपत्य है।

अथवा लं यह कन्द बीज है। तो संपूर्ण चराचर का मूल कारण मेरा सत्व है, यह अर्थ हुआ। इससे सर्वमूलाधार सत्व को सिद्ध हुआ।

